
याः शैलाञ्जन पादलेपगुतिका पातालयक्षाङ्गणा
त्रैलोक्योदरवर्तिनिसूत्रकगताःकर्मानुगाः सिद्धयः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

या: सर्वास्तु महद्धंय: स्वभवने सत्यं चलकान्विगा—
स्ता: सर्वा कल्तिा धन्ततिलकायोगप्रभावोदिता: ॥

इति चर्यावतिश्रीकृष्णाचार्येण गुरूपदेशमागम्य श्रीहेरुकभट्टारकस्यादेशाच्च स्वप्नगतमधार्य श्रीचक्रसंभवनाम्ना येनमुवाह्याभ्यन्तरं रुात: स्वरुपध्यानम् धास्फुटीकृत्य मन्दमत्या योगाववोधाय सूचितयै वसन्ततिलकेति वज्रवाराही ······ ·· कादेशाद्वस ततिलकेति तदाभिधानं ग्रन्थस्यापीति ॥ इति वसन्ततिलका समाप्ता ॥

समय:— श्रेयोऽस्तु सम्भत् ७९० वैशा (ख) वद्धि एकादश्यां लिखितं संपूर्णाम्

वसन्ततिलकम्

क्रमाङ्क: तृ ३२४ विषयाङ्क: ६०

ग्रन्थकार: प. कृष्णपादाचार्य: । नेपालीयं कागतम् । देवनागरीलिपि: ।
पङ्क्तय: ११ । आकार: १२'×६$\frac{3}{2}$ । । ग्रन्थसंख्या २०० । पत्रसंख्या ७ ।
दशमपटलान्तंपूर्णाम ।

समय:— इति सम्वत् १९५४ सालमिति माघवदि २ रोज शुभम ।

वसन्ततिलकटीका
(रहस्यदीपिका)[१]

क्रमाङ्क: तृ २९० विषयाङ्क: ६१

ग्रन्थकार: । नेपालीयं कागतम् । नेवारीलिपि । पङ्क्तय: ९ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

। ग्रथसंख्या ८०० । पत्रसंख्या ४१ । पूर्णा ।

आदिबाक्यम्

ॐ नमः सर्वबुद्धवोधिसत्वेभ्यः ।। नमःश्रीवज्रडाकाय ।।
षर्टत्रिंशतसम्विदाभिन्नस्वभावं हेरुकं प्रभुं ।
प्रणाम्य विर्वारिष्यामि वसन्ततिलकां क्रमात् ।।

चतुर्थमहामुद्रासिद्धिप्राप्तः स्त्रदरार्थसंपादनवद्धकज्यो (चो त्रिचित्र द्धु तयोगिनीतन्त्रोपदिष्टविशिष्टचरितसन्दर्शनार्वजितविनेयलौकिकलोकोत्तरचमत्कोरविकशतस्वशेमुषो (खी) प्रतिभासमानविवियोपदेशोद्वितीय श्रीहेरुक इव प्रत्यक्षदृश्यः ।। स्वयं प्रतिभासमानोन्नायविशेषन्तदर्थिभ्यः प्रकाशनाशयेन कृतोत्साह श्रीकृष्णापादेनाममहाचार्य इमामध्यात्मक्रमेण भगवतः श्रीहेरुकस्य साधनोपायिका वसन्ततिलकाभिधानामारिप्सुः स्वरुपानुस्मृतये स्वरूपाव्यतिरिक्तमेव स्वाभायुक्तं नमस्कर्तुं सप्तविषमेत्यादिना साधनोपायिकायां पीठिका रचितवान् । तत्रादौ तावद् अभिधानानि उच्यन्ते ।

पुष्पिकावाक्यानि—

इति वसन्ततिलकटीकायां निष्पन्नक्रमसाधनोपायिकायां रहस्यदीपिकाय द्वितीयनिर्देशस्य विस्तरव्याख्या

,, ,, तृतीयनिर्देशस्य व्याख्या

,, ,, चतुर्थनिर्देशे विस्तरव्याख्या

,, ,, पञ्चमनिर्देशे व्याख्या

,, ,, षष्ठनिर्देशे विस्तरव्याख्या

,, ,, सप्तमनिर्देशे विस्तरव्याख्या

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति वसन्ततिलकनिष्पन्नक्रमसाधनोपायिकाटीकायां सप्तमपटले विस्तरव्याख्या
„ „ अष्टपटलेविस्तार व्याख्या
„ „ नवमनिर्देशे विस्तरव्याख्या
„ „ दशमनिर्देशे विस्तरव्याख्या

अन्त्यवाक –

प्रमेयमिति श्रद्धाद्दढग्राहिणो ग्रन्थकार आत्मनः स्वरूपदर्शनमुखेन ग्रन्थ-समाप्ति दशयन्नाह ॥ इति श्री गुरुबुद्धेनेत्यादिना आत्मीयवज्रगुरुबुद्धबोधिसत्वाज्ञाप्राप्तेन तथागतकायस्थितेन चर्यावर्तिना मया कृष्णोदं वसन्ततिलकाख्यं दशनिर्देशात्मकं कृतं यत् परिसमाप्तमिति सर्वतन्त्रार्थसङ्ग्रहादन्यापेक्षाभावादित्यर्थ । इति वसन्ततिलकटीका समाप्ता ये धर्मा हेतुप्रभावा……… ।

यल्लेखनार्जितं । पुण्यं जनास्तेन जिनसुताः
भवन्तु सततं घोरसंसारोद्विग्नचतस ॥

समय. सम्वत् ८०४ मार्गशिल (२) शुक्लपक्षे सप्तम्यां तिथौ गुरुवारसरे धर्मराज-लिखित संपूर्णयातः शुभमस्तु सर्वजगतां ॥

वसन्ततिलकटीका
(रहस्यदीपिका)

क्रमाङ्कः च.१ विषयाङ्कः६२

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ५ ।
आकारः १२×२१/२ । ग्रन्थसंख्या ६५० । पत्रसंख्या ६७। अन्त्यखण्डिता ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वसन्ततिलकटीका
(रहस्यदीपिका)

क्रमाङ्कः तृ. ६५६ विषयाङ्कः ६३

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः ८ ।
आकारः १३$\frac{1}{4}$×५ । ग्रन्थसंख्या६५० । पत्रसंख्या ४३ । पूर्णा ।

वसुन्धराधारणी

क्रमाङ्कः च. ८८७ विषयाङ्कः ६४

ग्रन्थकारः । नेपालीयं कागतम् । रजतरञ्जनालिपिः । पङ्क्तयः ५ ।
आकारः ९$\frac{1}{4}$×८$\frac{1}{3}$ । ग्रन्थसंख्या २७५ । पत्रसंख्या २३ । पूर्णा ।

ॐनमो भगवत्यै आर्यश्रीवसुधारायै ॥
या संस्मृता सुधिरसुष्ठतरं प्रवृद्धं
दारिद्रदुःखदुरितं समते नराणां ।
तां कल्पवृक्षसदृशीं वसुधारसंज्ञां
भक्त्या नमामि शिरसा जगतो हिताय ॥

एवं मयाश्रुतमेकस्मिन्समये भगवान्कौशाव्यां महानगर्यां विहरतिस्म । कंटक सञ्ज्ञकमहा वनवरे घोषिलारामे महता भिक्षुसंघेन सार्द्धं त्रै पञ्चमात्रैः भिक्षुशतैः संबहुलैश्चः महाश्रावकै

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रसंख्यकैश्च बोधिसत्वैः महासत्वैः सर्वबुद्धधर्मगुणसमन्वागतैः परिवृतः पुरस्कृतो भगवान्सर्व-दारिद्रदुःखव्याधिपरिशोषणं नाम धर्मपर्याय देशयतिस्म ।

अन्त्यवाक्यम्—

भगवानाह ।। सुचन्द्रगृहपति परिपृच्छ इत्यपि धारय सर्वधनधान्यहिरण्यसुवर्णरत्न-निधानम मि) न्यपि धारय सर्वांशस्तान्यपि धारय सर्वतथागताधिष्ठित।(तं) वसुधारानाम धारणीकल्पमित्यपि इदमवोचद्भगवानात्तमना आयुष्मानन्द तेच भिक्षवः ते च बोधि-सत्वाः महासत्वाः सा च सर्वावती पर्षत् सदेवमानुषासुरगन्धर्वश्च लोको भगवतो भाषितमभ्य-नन्दन्निति ।। आर्यश्रीवसुधारानामधारणी परिसमाप्ता ।। महाराजाधिराजश्रीश्रीकवीन्द्र-जयप्रतापमल्लदेवस्य विजयराज्ये ।। श्रीसुवर्णप्रणालिमहानगरे तम्बराच्छेतोर भन्तारवाहार यिताच्छे गृहास्तव्य तुराधर जयराम, भार्या रुकुमयी तनुज हरिराम थ्वते प्रमुखनं थ्व भगवती श्री ३ वसुधारा नाम धारणी ओहोच चोचकं तया जुरो।

समयः- श्रेयोस्तु सम्वत् ७७६ श्रावणमासे शुक्लपक्षे त्रयोदश्यां तिथौ पूर्वाषाढानक्षत्रे विष्कुम्भयोगे बुद्धवार थ्व कुन्हु लिखितं संपूर्ण दिन जुरो ।। लिखितेयं सिक्वमगुडिया वज्राचार्य महाकुल श्रीश्रीमन्तदेवः ।

वसुन्धराधारणी

क्रमाङ्कः प्र. १४८३   विषयाङ्कः ६५

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ५ ।

आकारः १०½×३½ । ग्रन्थसंख्या ३०० । पत्रसंख्या ३५ । पूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वसुन्धराधारणी
वसुन्धरायाः नामाष्टोत्तरशतसहिता

क्रमाङ्कः द्वि. २११ विषयाङ्कः ६६

ग्रन्थकारः । नेपालीयं कागतम् । सुवर्णाक्षरलिपिः । । पङ्क्तयः ५ ।
आकारः १६×४ । ग्रन्थसंख्या २७५ । पत्रसंख्या १७ । खण्डिता ।

समय :— श्रेयोस्तु सम्वत ६७७ भाद्रमासे शुक्लपक्षद्वितीयातिथौ हस्तनक्षत्रे शुक्ल-
मयोगे वृहस्पनिवारसरे दिन कुन्हु पञ्चरक्षा वसुधारधारणी नामसंगीति
लिखितेयं मणिसंग्रहमहाविहारवज्राचार्य श्रीजयचन्द्रेणेति । शुभमस्तु ॥

वसुन्धराधारणी

क्रमाङ्क प्र १०७६ विषयाङ्क ६७

ग्रन्थकारः । ताडपत्राणि । प्राचीननेवारीलिपिः । पङ्क्तयः ५ ।
आकारः ११$\frac{3}{4}$× १$\frac{3}{4}$ । ग्रन्थसंख्या १३५ । पत्रसंख्या ६ । खण्डिता ।

वसुन्धराधारणी

क्रमाङ्कः तृ. ६९३ विषयाङ्कः ६८

ग्रन्थकारः । ताड़पत्राणि । नेवारीलिपिः । पङ्क्तयः ५ । आकारः ८$\frac{3}{4}$×२ ।
ग्रन्थसंख्या ३०० । पत्रसंख्या ३२ । पूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वसुन्धराधारणी

क्रमाङ्कः च. १०३० विषयाङ्कः ६९

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ७ ।
आकारः १२॥×३¾ । ग्रन्थसंख्या ३०० । पत्रसंख्या १४ । पूर्णा ।

वसुन्धराधारणी

क्रमाङ्कः तृ. २९० विषयाङ्क ७०

ग्रन्थकारः । नेपालीय कागतम् । नेवारीलिपिः । पङ्क्तयः ५ ।
आकारः ९½×२७/८ । ग्रन्थसंख्या ३०० । पत्रसंख्या ३१ । पूर्णा ।

वसुन्धराव्रतकथा
[व्रतावदानमालान्तर्गता]

क्रमाङ्कः तृ. २९० विषयाङ्कः ७१

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ७ ।
आकारः १४×४ । ग्रन्थसंख्या २४६ । पत्रसंख्या १३ । पूर्णा ।

समय :— सूर्यव्योमचन्द्रे (१०१२) वत्से नेमपाले भृगुवारे
शुचौ शिते तिथौ शिवेऽलिखद्व्रजधरेणेदं ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वसुन्धराव्रतकथा

(व्रतावदानमालान्तर्गता)

विषयाङ्कः ७२

क्रमाङ्कः प्र. ५६४

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः १० ।

आकारः १३×६½ । ग्रन्थसंख्या ३५८ । पत्रसंख्या १३ । पूर्णा ।

समय ;—इति सम्वत १९५४ साल मिति भाद्र शुदि १ रोज शुभम् ।

वसुन्धराव्रतकथा

विषयाङ्कः ७३

क्रमाङ्कः च. १०३३

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः पङ्क्तयः १० ।

आकारः ७×३ । ग्रन्थसंख्या २७० । पत्रसंख्या व्यसस्रक्रू । पूर्णा ।

वसुन्धराव्रतपद्धति

विषयाङ्कः ७४

क्रमाङ्कः च. ९५३

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ५

आकारः १२×२½ । ग्रन्थसंख्या २१५ । पत्रसंख्या १५ । पूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम —

ॐ नमः श्रीवसुधारायै ॥

नभस्य कृष्णातृतीये प्राते वस्त्रपलावृत उत्रा(त्त)राभिमुखं सुगन्धजर (ल) स्नानन्तु मन्त्रवीत ॥ देवी मन्त्राम्भास स्नात्वा संसारमरणासनं । सुतीर्थवारि(रिं)संगृहे (ह्य) विद्यालक्ष्मीमहावृतं । स्वगृहे वा प्र(पर)गृहे वा शुभस्थाने मनोरमे । वितानवितते कार्यं सूत्रञ्च रजमण्डल ॥ सर्वं गीतपद्यं वृतै वस्त्रै)संपूर्णचन्दनादिकं ॥ सूर्यार्घञ्च ततः कुर्यादद्यवाक्यं पठेत् गुरुः ।

अन्त्यवाक्यम् —

थ्वते अहोरात्रछि घरपा म्वातरै(ले) मफया अप्रसन्न मतेव क्षमा याङ प्रसन जुसेने थ्वते धाया व वृतसूत्र चेतस थुङा व मण्डरस भूमिते थकादिस्य स्वान वोयके केतनके निला पाठ समाप्त लिव धर्मुन मण्डल विसर्जन गुरुपूजा क्लेशाभिषेक विय, सिन्धुस्वान सग्वन आशिर्वाद, वरि धातकरछोय, लि व मण्डलविसर्जन रजस्वा चोयके तिर्थलंखया मण्डर चोया थाय हाया(य) सकल्यं ह्यायाय कुमारीपूजा ॥

वसुन्धरास्तोत्रादिसङ्ग्रहः

क्रमाङ्कः प्र. २२० विषयाङ्कः ७५

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ६ ।
आकारः ८८×, । ग्रन्थसख्या ५० । पत्रसंख्या ६ । खण्डितः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वादसारावली

क्रमाङ्कः तृ ६६३ विषयाङ्कः ७३

ग्रन्थकारः । ताडपत्राणि । नेवारीलिपिः । पङ्क्तयः ६ ।
आकारः ७३/४ × १/२ । ग्रन्थसंख्या ६० । पत्रसंख्या ५(७७–८१) ।

आदिवाक्यम् —

नम. सिद्धपुरुषेभ्यः ।।
रससिद्धान्नमस्कृत्य सर्वसौख्यवरप्रदान्
वादसारावलि व्रुमः योगिनो विन्ध्यवासिनः ।।
शिष्यो हि सुप्रयुक्तो हि रसमादौ सुपोधयेत् ।
यत्नतो ग्रन्थमार्गेण वादतत्वविशोधक. ।।

अन्त्यवाक्यम —

इत्याह भगवान् शास्ता आदिवुद्धो रसान्तरे ।
जीवनभुक्तिश्च मुक्तिश्च सर्वार्थसाधकं महत् ।।
को नाम भजते नात्र पण्डितो भावबोधकः ।
गोपितव्यं प्रयत्नेन यथा केश्चिन्न बुध्यते ।।
अन्यथा सर्वनाश स्यात् मूढे ज्ञानप्रदानतः ।
चीरसारं यथा चीराद्वादसार तथा पुनः ।
भाषितं पुत्रवन्ध्वर्थे यत्नतो वादतन्त्रत. ।
इति वादसारः समाप्तः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वासिष्टपरिपृच्छावदानम्

क्रमाङ्कः तृ २६० विषयाङ्कः ७७

ग्रन्थकारः । . ालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ६ ।
आकार. १४½×४ । ग्रन्थसंख्या ~७५ । पत्रसंख्या १७ । पूर्णाम् ।

समय :— सं. ७२० शुभं।

वासिष्टपरिपृच्छावदानम्

क्रमाङ्क तृ. ५६४ विषयाङ्कः ७८

ग्रन्थकारः । नेपालीयं कागतम्। देवनागरीलिपिः। पङ्क्तयः १४।
आकारः १२½×६½ । ग्रन्थसंख्या ३०० । पत्रसंख्या १६ । पूर्णाम् ।

समयः—

सम्वत् १९५६ साल मिति मार्गवदि ८ रोज ७ शुभम ।

वासिष्टपरिपृच्छावदानम्

क्रमाङ्क तृ. ५६४ विषयाङ्कः ७९

ग्रन्थकारः । नेपालीय कागतम । देवनागरीलिपिः । पङ्क्तयः १० ।
आकारः १२॥×६॥ । ग्रन्थसंख्या ४५० । पत्रसंख्या १८ । पूर्णाम् ।

समयः:- सम्वत् १९५४ साल मिति पौष कृष्ण १० रोज १ शुभम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विचित्रकर्णिकावदानं (विचित्ररत्नावदानं)

क्रमाङ्कः च. १२६ विषयाङ्कः ८०

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ८ ।
आकार. १३×४ । ग्रन्थसंख्या ३५०० । पत्रसंख्या १५० । पूर्णं
नवमोध्याय.यान्तम् ।

आदिवाक्यम्—

ॐ नमो भगवते गुणाकाराय ॥ नमो रत्नत्रयाय ॥
वुद्धःस्वयं भ्रुविवरात् ··· प्रकाश्य श्रियं त्रिलोकेषु विवस्वदेश ।
पापान्धकारं शमते नराणा नमोस्तु तस्मै गुणाकाराय ॥
नत्वा त्रिरत्नं द्विजगत्प्रधानं त्रयीगुणाधारमनन्यमूर्ति ।
मोक्षाश्रयं लोकहिताय वक्ष्ये विचित्ररत्नाद्यवदानमालां ॥
चित्तप्रसन्नेन श्रृणोति यः श्रीविचित्ररत्नाद्यवदानमालां ।
शुद्धत्रिकायस्य जिनात्मजत्वं श्रुत्वा भवेद्बोधिगुणाभिलाभी (षी) ।

अन्त्यवाक्यम्—

इति श्रीमुनिनादिष्टं श्रुत्वासौ भिक्षुसत्तम. ।
भगवन्तं समानम्य कृताञ्जलि रुवाचतु ॥
प्रबोधोहं महानाथ प्रबोधोहं मुनीश्वर ।
धन्यधन्यो स सच्चित्तः श्रद्धेति प्रतिबोधितः ॥
इति मे गुरुणाख्यातं श्रुत्वाहं ते तथोच्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वमपि यत्कृते धर्मे श्रद्धालुर्भव सर्वदा ॥
इति जयश्रियाख्यात श्रुत्वा सर्वे सभाजनाः ।
धन्य धन्यमुनीन्द्रति प्राय्यनन्दप्रबोधिताः ॥

विचित्रकर्णिकावदानम् (विचित्ररत्नावदानम्)

क्रमाङ्कः तृ. २४४ विषयाङ्कः ८१

ग्रन्थकारः । नेपालीयं कागतम । देवनागरीलिपिः । पङ्क्तयः १६ ।
आकारः १८½×८¼ । ग्रन्थसंख्या ४००० । पत्रसंख्या ८३ ।
पूर्ण २० अध्यायान्तम् ।

समय :— सम्वत १९५८ साल मिति कार्तिक शुदि ९ रोज शुभम् ।

विजयवाहिनीधारणी

क्रमाङ्कः च. २२ विषयाङ्कः ८२

ग्रन्थकारः । नेपालीयं कागतम । नेवारीलिपिः । पङ्क्तयः ६ ।
आकारः १०५/४×२९/१० । ग्रन्थसंख्या ६० । पत्रसंख्या ५ । पूर्णा ।

विद्याधरविनोदतन्त्रम्

क्रमाङ्कः तृ. ६९३ विषयाङ्कः ८३

ग्रन्थकारः आचार्यः, अचलनाथः । ताड़पत्राणि । नेवारीलिपिः । पङ्क्तयः ६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आकारः ७¾ × १⅞ । ग्रन्थसंख्या ७२ । पत्रसंख्या ७ [९ – १५] । पूर्णम् ।

आदिवाक्यम् —

ॐ नमो वज्रसत्वाय ॥

महाचण्डवीर उवाच – एवं मया श्रुतमेकस्मिन्समये पृच्छक भगवान् वज्रसत्वं वज्रप- द्मसमागमे सकायवाक्चित्तधारणा, अनेकवज्रयोगिभिर्वज्रदेवगणैः । एवं प्रमुखैर्वज्रबुद्ध- कोटीनियुतशहस्रैः ॥ भावाभावविनिर्मूक्त श्चतुरानन्दैकतत्पर: दिव्यकायसुखस्थितः वज्राद्मसमायोगात्महानन्दसुखस्थिते बोधिचित्तधारणा [णं] सर्वतन्त्रेषु गोपिता (तं) गुप्त- तन्त्राधिराजं कृपया कथयस्व मे नाथ ।

अन्त्यवाक्यम —

गुटिकं मुखे प्रक्षिप्य सुप्रज्ञां तदा र(ल)भेद्योगी प्रतासतं वास्त्रः शतस- हस्रसंख्यायाः सिद्ध्यते तत्क्षणादेव पद्ममात्रप्रयोगतः ॥

श्री अचलनाथस्य कृतिरियं विद्याधरविनोदतन्त्रगुप्ततन्त्राधिराजः समाप्तः ।

समय :—– सम्वत् ५६६ फाल्गुणमांसे लिखितं सत्वार्थहेतुना ।

विंशिकाभाष्यम्
[विज्ञप्तिमात्रतासिद्धिः]

क्रमाङ्क प्र. १६६७ क १ विषयाङ्कः ८४

ग्रन्थकारः आचार्यः वसुबन्धुः । ताडपत्रात्मा । प्राचीननेवारीलिपिः । ग्रन्थाङ्कः ८८ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आकार: १२ × २½ । ग्रन्थसंख्या १६० । पत्रसंख्या ६ ।
आद्यैकपत्रखण्डितम् ।

विश्वन्तरावदानम्
(जातकमालान्तर्गतम्)

क्रमाङ्कः तृ. २४४ विषयाङ्कः ८५

ग्रन्थकार: । नेपालीयं कागतम् । देवनागरीलिपि: । पङ्क्तय: १४ ।
आकार: ८¾ × ८½ । ग्रन्थसंख्या ५०० । पत्रसंख्या १० । पूर्णम् ।

आदिवाक्यम् —

ॐ नमो रत्नत्रयाय ॥

अथ खलु श्रावस्त्यां जेतवने अनाथपिण्डस्यारामे विहरतिस्म महता (द्भिः) एकोनपञ्चभि-रहच्छतैश्चानेकदेवासुरनरयक्षराक्षसादिपर्षद्भिस्सार्द्धं । तत्र पर्षदि उपोषढो नाम देवपुत्रः स्वाशनादुत्थाय भगवत रन्तीके गत्वा दक्षिणा जानुमण्डलं भूमौ प्रतिस्थाप्य कृताञ्जलिना प्रार्थयामास । भूतपूर्वं भगवन् वंकनामतपोवने विहरति समये भगवता आज्ञाप्तं सर्व धर्मकथां श्रु(त्वा) कृतार्थनामभून्मम पुनर्भगवन्पुरातनकथां[श्रोतुं] प्रार्थयिष्यामि ॥

अन्त्यवाक्यम्

तत्र राजकुलपिता शिविराजा, माता संजयनी, पत्नी मद्री, तनयौ ते सर्वे दृष्ट्वातिविष्मयमापन्नोनिहृषमानसा मातापितरौ [त्रोः] पादौ नत्वा परस्परं कुशलं पृच्छय पूर्वदानशालायां प्रविश्य शेषदानं यद्विद्यते तच्छर्वं याचकेभ्यः दानं दत्वा विसर्जनं कृत्वा सर्वे सुखेन तथागतनाममनुस्मृ य तिष्ठति ततः समयेण दानपारमितायां परयिन्वा कतिचिद्दिवसे

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथागतकायो भूत्वा तथागतवर्णो सत्कृत्य धर्मश्रवणे चोपनीयं सर्वे मोक्षपदगामी(मिनः)भवतीति [भवन्तीति] । इति जातकमालायां विश्वन्तरजातक नवमं समाप्तं ॥

वीतरागाष्टककथा
(स्वायंभूपुराणान्तर्गता)

क्रमाङ्कः च. १६ विषयाङ्कः ८६

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ६ ।
आकारः १३ × ३½ । ग्रन्थसंख्या २५० । पत्रसंख्या ३४ । अन्त्यखण्डिता ।

[स्वायंभूपुराणान्तर्गता]

क्रमाङ्कः च. १०३१ विषयाङ्कः ८७

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः ७ ।
आकारः १२¼ × ४¾ । ग्रन्थसंख्या ११० । पत्रसंख्या ९ । खण्डिता ।

वीतरागाष्टककथा

क्रमाङ्कः त्र. ६५१ विषयाङ्कः ८८

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः ८ ।
आकारः १२½ × ४½ । ग्रन्थसंख्या १४३० । पत्रसंख्या ६९ । पूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पिकावाक्यानि —

इति मणिचूडावदानम् (मणिलिङ्गेश्वरकथा)
,, गोकर्णेश्वरवीतरागकथा
,, कीलेश्वरवीतरागकथा
,, सर्वेश्वरवीतरागकथा
,, गोपालेश्वरवीतरागकथा
,, फणिकेश्वरवीतरागकथा
,, गन्धेश्वरवीतरागकथा
,, त्रिकमेश्वरवीतरागकथा

वीतशोकावदानम्

क्रमाङ्कः तृ. ६५८ विषयाङ्कः ८९

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः ८ ।
आकारः १२ × ४½ । ग्रन्थसंख्या ५८० । पत्रसंख्या २६ । पूर्णम् ।

आदिवाक्यम् —

ॐ नमो बुद्धाय ।
अथ ते भिक्षवःसर्वे सद्धर्मगुणप्राप्तये ।
जयश्रियं यतिं प्राज्ञं नत्वैवं प्रार्थयेत्पुनः ॥
भदन्त श्रोतुमिच्छामि पुनरन्यत्सुभाषितं ।
तद्यथा गुरुणाख्यातं तथादिष्टुं समर्हसि ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति तैः प्रार्थितं श्रुत्वा स जयश्री जिनांशजः ।
तान्सर्वान्समितिं दृष्ट्वा पुनरेवमभाषत ॥
शृणुध्वं भिक्षवः सर्वे यथा मे गुरुणोदितम ।
वीतशोकावदानं तत्प्रवक्ष्याम्यधुना तथा ॥

अन्त्यवाक्यम् —

ये श्रुत्वेदं मुयुक्तं जिनगुणादिशतावीतशोकावदान
प्रामोद्यं श्रावयन्ति प्रमुदितमनसः श्रद्धया सज्जनाश्च।
ते सर्वे बोधिसत्वाः कलिबलविजिताः मारपाशाद्विमुक्ताः
संबोधिमार्गलब्ध[ब्धाः] सुगतवृषधरा यान्ति बौद्धालयेषु ॥
एतदुक्त्वा जयश्री मुनिवरगुणभृन्सर्व सत्वहितार्थी
ध्यानं कृत्वा समाधिप्रणिहितहृदयोभूत्तथा विश्रमार्थी ॥
श्रुत्वा सर्वेपि लोकाः प्रमुदितमनसो बोधिवर्यानुरक्ता
बोधौ चित्तं निधाय त्रिमणिशरणगताः प्रत्यनन्दत(न्)सहर्षाः ॥
इति श्रीवीतशोकावदानं समाप्तम् ।

व्रतावदानमालायाः
सुवर्णवर्णावदानं

क्रमाङ्कः तृ. २९५ विषयाङ्कः ९०

ग्रन्थकारः । नेपालाय कागतम् । नेवारीलिपिः । पङ्क्तयः ८ ।
आकारः १४½×४ । ग्रन्थसंख्या १४०० । पत्रसंख्या ४८ । मध्यखण्डितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्रतावदानमाला

क्रमाङ्कः तृ ६७० विषयाङ्कः ६१

ग्रन्थकारः । नेपालीय कागतम् । देवनागरीलिपिः । पङ्क्तयः ११ ।
आकारः $12\frac{1}{4} \times 6$ । ग्रन्थसंख्या १३०० । पत्रसंख्या ५२ । पूर्णा ।

शतपत्रजातकप्रक्रिया
(जातकमाला)

क्रमाङ्कः त ७३४ विषयाङ्कः ६२

ग्रन्थकारः आर्यशूरपादः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ५ ।
आकार. $10\frac{1}{2} \times 3\frac{1}{2}$ । ग्रन्थसंख्या ४००० । पत्रसंख्या ३४३ । पूर्णा ।

समयः—सम्वत् ७६६ पौषकृष्ण षष्ठम्या (यां) तिथौ फाल्गुणिनक्षत्रे सौ (शो) भनयोगे स्व (सो) मवारसरे नोगेभोत विश्वन्तर नाम स्वार्थ थें. ले (लि) खिता इति शतपत्र-जातकप्रक्रिया संपूर्ण जाता शुभं ॥

शतसहस्रिकाप्रज्ञापारमिता
(प्रथमखण्डः)

क्रमाङ्क तृ. ६३० विषयाङ्कः ६३

ग्रन्थकारः । नेपालीय कागतम । नेवारीलिपिः पङ्क्तय १० ।
आकारः $17^{?} \times 5\frac{1}{2}$ । ग्रन्थसंख्या २५००० । पत्रसंख्या ४६७ । पूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम् —

ॐनमःश्रीसर्वबुद्धबोधिसत्वार्यश्रावकप्रत्येकबुद्धेभ्यः ॥
या सर्वज्ञतया नयत्युपशमान् शान्तैषिणः श्रावकान्
या मार्गज्ञतया जगद्धितकृता लोकार्थसंप्रापिका ।।
सर्वाकारमिदं वदन्ति मुनयो विश्वं यया सङ्गता
(तस्यै) श्रावकबोधिसत्वगणिनो बुद्धस्य मात्रे नमः ॥
यदसुलभमनन्तकल्पकोटिभिः प्रसरशतैरपि हेतुवर्जितानां ।
भवतु हि जिनाकरिस्मिभूतं तदिदमिदंप्रति चक्षुरग्रयानं ॥
गंभीरञ्च न चाभ्यस्तं दुर्लभञ्च मुनेः वचः ।
न तेन विना मोक्षं तस्माच्छ्रोतव्यमादरात् ॥

अन्त्यवाक्यम —

तत्कस्य हेतोः । न ह्यायुष्मच्छारवतीपुत्र मनःसंस्पर्शप्रत्यवेदना सत्तायां, मनःसंस्प्रत्ययवेदना शून्यतायां, मन.संस्पर्शप्रत्ययवेदना त्रिविक्तायां, मनःसंस्पर्शप्रत्ययवेदना स्वभावतायां पूर्वान्त उपलभ्यते नापरान्त उपलभ्यते न मध्यम मुपलभ्यते चान्यमनःसंस्पर्शप्रत्ययवेदना सत्तान्या मनःसंस्पर्शप्रत्यवेदना शून्यतान्या, मन.संस्पर्शप्रत्ययवेदना विविक्तान्या, मनःसंस्पशप्रत्यवेदना स्वभावतान्या बोधिसत्वोन्यः पूर्वान्तोन्योपरान्तोन्यन्मध्यमिति ह्यायुष्माच्छारवतीपुत्रया च मनःसंस्पर्शप्रत्यवेदनासत्ता, या च मनःसंस्पर्शप्रत्ययवेदना शून्यता, या च मन.संस्पर्शप्रत्ययवेदना विविक्ता याच मन.संस्पर्शप्रत्ययवेदना स्वभावता यश्च बोधिसत्वो यो पूर्वान्तो यश्चापरान्तो यश्च मध्यं सर्वमितदद्वयमद्वैधीकार ॥ इति शतसाहस्र्याः प्रज्ञापारमितायाः द्वादशपरिवर्तः प्रथमखण्डः समाप्तः । ये धर्मा हेतुप्रभवा हेतुस्तेषां तथागतो, ह्यवदत्तेषांच यो निरोध एवंवादी महाश्रमणः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देयधर्मोयं प्रवलमहायानयायिन परमधार्मिकदानपति गुलाधर्वेषामिहप्रमुख-सपरिवारेण(राणां)यदत्त(त्र) पुण्यं । तद्भवत्वाचार्योपाध्यायमातापितृ सर्वज्ञं कृत्वा सकल सत्वराशेऽनुत्तरायां सम्यक्सम्बोधिप्राप्त (ये) इति ।

सदा जय श्रीमत् लक्ष्मीविभूतिः पुण्यार्जितं कर्म यत्पूर्वजन्मः ।
नेपालदेशे प्रविराजतेसौ नाम्ना महीन्द्रः क्षितिपः प्रधानः ॥
खद्गानलं तस्य करेषु रश्मिन् सर्वान्परान्हि रिपु निर्दहन्ति ।
कृत्वापि राज्य सुनिकण्ठकेन प्रख्यातकीर्तिः श्रीकान्तिपुरि ॥
पुण्येन च तत्र स धर्मगञ्ज पारमितां प्रज्ञाप्रकाशतेन ।
क्षेम सुभिक्षं तु सदा निरोगमारोग्यसौख्यं च प्रजा सु सन्तु
प्रह्लादं प्रार्पयितुं सुखेन पदवीं सम्पद्द्वयावाहिनीं
कारुण्यं हितचेतसा भगवता बुद्धेन सन्दीपितं ।
श्रुत्वा तेखिलधर्मतत्त्वनिलयं सूत्रं समाधानतो
गत्वा स्थानेनाहंन्निशा स उन्मतश्चार्य श्रुत्वाभ्यागता ॥
कालेस्मिन्नवदुष्टसंकुर (कु)लो पाठेपि दूरंगते
नानाभेदमनेकपुस्तकगतां (तं) दृष्ट्वाधुना श्रद्धया ।
कुण्यङ्गीदिग्गजे द्रकुम्भदलने भद्रेण सन्तर्पिताः
प्रज्ञा श्रीकरुणामया परहितैः सेयं बुधैर्गृह्यताम् ॥
दापकोयं ससद्धर्म प्रज्ञापारगमिना मुदा ।
सदा मुक्त्यार्थिना भक्त्या वेखासिंहेन श्रद्धया ॥

समय — क्षितिभुवनतरण्या उच्चप्रासादशोभा
गुणिजनपरिपूर्णा सर्वलक्ष्मीनिवासा ।
सुरगणमुनिवासा मण्डपस्तूपभूना
सुरभुवनसमा श्रीनेपाल पूर्व भाति ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्यां नगर्यां भूपतिः सन्नितिशास्त्रगुणनाटककाव्यविज्ञो
दुःखान्तको सु ... ... गत वेगाबशैवसेवी

अत्युग्रशत्रुविविधान्सकलान्विजित्य श्रीमहीन्द्रसिंहनृपतिः प्रविराजतेसौ श्रेयोस्तु सम्बत् ८३५ बैशाषमास्य शुक्लपक्षसप्तमी प्रबष्टम्यां तिथौ पुनर्वसुनक्षत्रे शूलजोगे (योगे) जथा (यथा) कर्णमुहुर्त्ते (मुहूर्ते) वुधवारसरे मेषराशिगते सवितरि मिथुनराशिगते चन्द्रमसि थ्व कुन्हु सम्पूर्णप्रधिष्ठा (प्रतिष्ठा) याङा।

शतसाहस्रिकाप्रज्ञापारमिता
(द्वितीयखण्डः)

क्रमाङ्कः च. ६३१ विषयाङ्कः ६४

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः १० ।
आकारः १७$\frac{3}{4}$×५$\frac{1}{4}$ । ग्रन्थसंख्या २५००० । पत्रसंख्या ४८८ । पूर्णा ।

आदिवाक्यम् —

ॐ नमःश्रीसर्वबुद्धबोधिसत्वेभ्यः ॥

पृथ्वीधातु सत्तया युष्मच्छारवतीपुत्र पूर्वान्ततो वोधिसत्वो नोपैति । पृथ्वीधातु शून्यतया पूर्वान्ततो वोधिसत्वो नोपैति । पृथ्वीधातु विविक्ततया पूर्वान्ततो वोधिसत्वो नोपैति । पृथ्वीधातु स्वभावतया पूर्वान्ततो वोधिसत्वो नोपैति । पृथ्वीधातु सत्तया अपरान्ततो वोधिसत्वो नोपैति । पृथ्वीधातु शून्यतया अपरान्ततो वोधिसत्वो नोपैति । पृथ्वीधातु विविक्तया अपरान्ततो वोधिसत्वो नोपैति । पृथ्वीधातु स्वभावतया अपरान्ततो वोधिसत्वो नोपैति ।

पृथ्वीधातु सत्तया मध्यतो वोधिसत्वो नोपैति । पृथ्वीधातु शून्यतया मध्यतो वोधिसत्वो नोपैति । पृथ्वीधातु विविक्ततया मध्यतो वोधिसत्वो नोपैति । पृथ्वीधातु स्वभावतया मध्यतो वोधिसत्वो नोपैति । तत्कस्य हेतो र्न ह्यायुष्मच्छारवतीपुत्र पृथ्वीधातु सत्तायाश्च, पृथ्वीधातु

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शून्यतायां, पृथ्वीधातु विविक्तायां, पृथ्वीधातु स्वभावतायां पूर्वान्ततोपलभ्यते नापारान्त उपलभ्यते । न मध्यतमुपलभ्यते । न चान्या पृथ्वीधातु सत्तान्या पृथ्वीधातु शून्यतान्या पृथ्वीधातु विविक्तान्या, पृथ्वीधातु स्वभावतान्या च बोधिसत्वाश्च पूर्वान्तोऽन्योऽपरान्तोन्यन्मध्यमिति ॥ न ह्यायुष्मच्छारवतीपुत्र याच पृथ्वीधातु सत्ता या च पृथ्वीधातु शून्यता याच पृथ्वीधातु विविक्ता या च पृथ्वीधातु स्वभावता यश्च बोधिसत्वो यश्च पूर्वान्ततो यश्चापरान्ततो यच्च मध्यं सर्वमेतद् द्वैधीकारं ॥

अन्त्यवाक्यम्—

आवेणिक बुद्धधर्मबला समुदागमत्तया प्रज्ञापारमिताबला समुदागमत्ता द्रष्टव्या । श्रोतापत्तिफलबला समुदागमत्तया प्रज्ञापारमिताबला समुदागमत्ता द्रष्टव्या । सकृदागामिफलबला समुदागमत्तया प्रज्ञापारमिताबला समुदागमत्ता द्रष्टव्या । अनागामिफलबला समुदागामत्तया प्रज्ञापारमिताबला समुदागमत्ता द्रष्टव्या। अर्हत्वबला समुदागमत्तया प्रज्ञापारमिताबला समुदागमत्ता द्रष्टव्या, प्रत्येकबोधिबला समुदागमत्तया प्रज्ञापारमिताबला समुदागमता द्रष्टव्या । मार्गाकारज्ञताबला समुदागमत्तया प्रज्ञापारमिताबला समुदागमत्ता द्रष्टव्या । अनुत्तरा सम्यक्सं बोधिबला समुदागमत्तया प्रज्ञापारमिताबला समुदागमत्ता द्रष्टव्या, अनेनापि भगवन्दर्यायेण महापारमितेय बोधिसत्वानां महासत्वाना यदुत्तप्रज्ञापारमितेति ।

इतिश्री शतसाहस्र्याः प्रज्ञापारमितायाः षद्विंशतितमः परिवर्तद्वितीयखण्डः समाप्तमिति ।

समय :— स्वस्तिश्रीमत्पशुपतिचरणकमलधूलिधूसरितशिरोरुह श्रीमत्मानेश्वरीष्टदेवता वरलब्धप्रसाददेदीप्यमान मानोन्नत श्री रघुवंशावतारश्रीरविकुलतिलकहनुमद्ध्वज नेपालेश्वर महाराजाधिराज सकलराजचक्राधीश्वर सर्वविक्रमप्राजितगजपति विराजमान श्री श्रीजयमहीन्द्रसिंहदेवप्रभुथाकुलस्य विजयराज्ये ॥ श्रेयोस्तु ॥ सम्वत् ८३५ वैशाषमासय शुक्लपक्ष पञ्चमी प्रषष्टांतिनो … … …

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शतसाहस्रिकाप्रज्ञापारमिता
(तृतीयखण्डः)

क्रमाङ्कः तृ. ६३२ विषयाङ्कः ९५

ग्रन्थकारः। नेपालीयं कागतम् । देवनागरीलिपिः. पङ्क्तयः १०।
आकारः १७ × ५ ग्रन्थसंख्या २५००० । पत्रसंख्या ४२९ । पूर्णा ।

आदिवाक्यम् —

ॐ नमो भगवत्यै आर्यप्रज्ञापारमितायै ।।

अथायुष्माच्छारद्वतीपुत्रो भगवन्तमेतद्वोचत् । यो भगवन्वोधिसत्वो महासत्व इह गंभीरायां प्रज्ञापारमितायामधिमोदयन्ते। कुतः सच्युत्वैहागतः कियच्चिरं सप्रस्थितो वा स कुलपुत्रो वा कुलदुहिता वाऽनुत्तरायै सम्यक्सम्बोधये कियन्तस्तेन तथागता अर्हन्तः सम्यक्सम्वुद्धाः पर्युपासिताः कियच्चिरं वा स दानपारमितायां चीर्णाः कियच्चिरं वा स शीलपारमितायां चीर्णाः कियच्चिरं वा सः क्षान्तिपारमितायां चीर्णा कियच्चिरं वा सः वीर्यपारमितायां चीर्णाः कियच्चिरं वा स ध्यानपारमितायां चीर्णा कियच्चिरं वा सः प्रज्ञापारमितायां चीर्णाः । य इमां गंभीरां प्रज्ञापारमितामर्थतो वा नयतो वाधिमोदयते। भगवानाह ।।

अन्त्यवाक्यम् —

या च तथागतवलानां तथता, या च सर्वाकारज्ञतायास्तथता, एकैवैषा तथताऽद्वयाऽद्वैधीकारा । या वैशारद्यानां तथता या च सर्वाकारज्ञतायास्तथता एकैवैषा तथताऽद्वयाऽद्वैधीकारा । या च प्रतिसम्विदां तथता या च सर्वाकारज्ञतायास्तथता एकैवैषा तथताऽद्वयाऽद्वैधीकारा । या च महामैत्र्यास्तथता या च सर्वाकारज्ञतायास्तथता एकैवैषा तथताऽद्वयाऽद्वैधीकारा । या च महाकरुणायास्तथता या

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च सर्वाकारज्ञताया स्तथता एकैवैषा तथताऽद्वयाऽद्वैधीकारा । या चावेणिक बुद्धधर्माणां तथता या सर्वाकारज्ञताया स्तथता एकैवैषा तथताऽद्वयाऽद्वैधीकारा आर्यशतसाहस्रिकायाः प्रज्ञापारमितायाः षट्त्रिंशत्तमः परिवर्तः समाप्तः । तृतीयखण्डः ।

समय :— स्वस्ति श्रीमत्धर्मधातुचरणा(णा)कमलधूगी ली)धूसरितशिरोरुह श्रीमत्वागीश्वरीष्टदेव गावरलब्धप्रसाददेदीप्यमानोन्नत श्रीरघुवंशावताल (र) रविकुलतिलक, हनुमद्ध्वज नेपालेश्वर महाराजाधिराज सकल राजचक्राधीश्वर निक्रमप्राग्जितगजपतिपदविराजमान, श्रीश्री जयमहीन्द्रसिंहदेवस्य विजयराज्ये श्रेयोस्तु सम्वत् ८२५ वैशाषमास्य शुक्लपक्षपञ्चमी प्रषष्टम्यां । इत्यादि ... ...

शतसाहस्रिकापारमिता
(चतुर्थखण्डः)

क्रमाङ्कः तृ. ६३२ विषयाङ्कः ९६

ग्रन्थकारः । नेपालीय कागतम । नेवारीलिपिः । पङ्क्तयः १० ।
आकारः १७३/४×४१/४ । ग्रन्थसंख्या २५००० । पत्रसंख्या ४९१ । पूर्णा

आदिवाक्यम —

ॐ नमो भगवत्यै आर्यश्रीप्रज्ञापारमितायै ॥
प्रज्ञापारमितामेव प्राप्तो प्रज्ञाश्रयोदयं ।
प्रज्ञाप्रख्यातसत्कीर्तिं तां प्रज्ञां प्रणमाम्यहं ॥
पितरं बोधिसत्वानां सुगतं गतकिल्विषं ।
प्रज्ञाप्राप्तोप्रनिर्वाण नमामि करुणात्मक ॥
या सर्वज्ञतया नयत्युपशमान् शान्तैषिणः श्रावकान्
या मार्गज्ञतया जगद्धितकृता लोकार्थसम्पादिका ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वाकारमिदं वदन्ति मुनयो विश्वं यया संगता ।
तस्यै श्रावकबोधिसत्वगणिनो बुद्धस्य मात्रे नमः ॥

अथ खलु कामवचरा रूपावचराश्च देवपुत्रा दिव्यानि चन्दनचूर्णानि दिव्यानि उत्पल-कुमुदपौन्दरीकाणि गृहित्वा येन भगवान्तेन क्षिपंतिस्म । क्षिप्ता श्च येन भगवान्तेनोपसं-क्रम्य भगवतः पादौ शिरोभिः वन्दित्वैकान्ते तस्थुरेन (ए) कान्ते स्थिता स्ते कामावचरा रूपावचराश्च देवपुत्रा भगवन्तमेतदवोचन् ।

अन्त्यवाक्यम् —

सुभूतिराह — यत्पुनर्भगवतोक्तं शुन्यतायांनचरति ॥ न च द्वयेनोपल-भ्यते ॥ नकश्चिद्धर्मा येन शून्यता ॥ तस्माद्भगवन् च समो धर्मा (र्मो) निर्माणसमयं धर्मा (र्मो) न निर्मित्तं भविष्यति ।

भगवानाह — एवमेतत् सुभूते सर्वधर्माः । सुभूते अभावशून्या स्तेन श्रावकैः कृताः न प्रत्येकबुद्धैर्न बोधिसत्वैर्महासत्वै र्न तथागतै रर्हद्भिः सम्यक्संबुद्धैः कृताः । या च स्वभावशून्यता न निर्वाणम् ॥

सुभूतिराह — आदिकर्मिको भगवन्पुद्गलः कतमश्च वेदितव्यः, कथम-नुशासितव्यो यः स्वभावशून्यता परिजानियात् ।

भगवानाह — किम्पुनः सुभूते पूर्वंभावोऽभूत् । य प)श्चादभावो भवि-ष्यति । नात्र सुभूते भावो नाभावो न स्वभावो न परभाव, कुत एव स्वभावशून्यता भविष्यति । यां परिजानीयादिति ॥

शतसाहस्र्याः प्रज्ञापारमितायाः अक्षोभ्य धर्मतानिर्देशः सप्तशतितमः परिवर्तः चतुर्थखण्डः । इदमवोचद्भगवान् आत्तमनात्तमना स्तेच दशदिक्संनिपतिताः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वोधिसत्वा· महासत्वा स्ते च महाश्रावकाः सदेवमानुषासुरगन्धर्वश्च लोको भगवतो भाषितमभ्यनन्दनिति ॥ इत्यादि ... ...

शतसाहस्त्रिकाप्रज्ञापारमिता
(प्रथमखण्डः)

क्रमाङ्कः तृ. २२७ विषयाङ्कः ६७

ग्रन्थकारः । नेपालीयं कागतम । देवनागरीलिपिः । पङ्क्तयः १३ ।
आकारः १६$\frac{1}{2}$×८$\frac{1}{4}$ । ग्रन्थसंख्या २५००० । पत्रसंख्या ४६८ । **पूर्णा** ।

समय :— इति शालिवाहनीयशके १८१८ श्रीविक्रमार्कसम्वत् १९५३ श्रीनेपालीय सम्बत १०१६ सालमिति नष्ट ज्येष्ठ शुक्ल ३ रोज ६ तद्दिने सम्पूर्णम् ।

शतसाहस्त्रिकाप्रज्ञापारमिता
(द्वितीयखण्डः)

क्रमाङ्कः तृ. २२८ विषयाङ्कः ६८

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः १४ ।
आकार १६$\frac{1}{2}$×८$\frac{1}{2}$ । ग्रन्थसंख्या २५००० । पत्रसंख्या ४५२ । पूर्णा ।

समय :— श्री सम्वत् १९५१ साल मिति माघ शुदि ६ रोज शुभम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शतसाहस्त्रिकाप्रज्ञापारमिता
(तृतीयखण्ड:)

क्रमाङ्कः च. २२९ विषयाङ्क: ९९

ग्रन्थकार: । नेपालीयं कागतम् । देवनागरीलिपि: पङ्क्तय: १३ ।
आकार: २०×८$\frac{७}{८}$ । ग्रन्थसंख्या २५००० । पत्रसंख्या ५११ । पूर्णा ।

समय :—श्री शाके १८१६ श्रीसम्बत १९५१ श्रीनेपालीयसम्वत १०१५ साल मिति चैत्र शुदि २ रोज तद्दिने समाप्तम ।

शतसाहस्त्रिकाप्रज्ञापारमिता
(चतुर्थखण्ड:)

क्रमाङ्क तृ २३० विषयाङ्क: १००

ग्रन्थकार: । नेपालीय कागतम् । देवनागरीलिपि: ; पङ्क्तय: १३ ।
आकार: २१$\frac{१}{२}$×८$\frac{३}{४}$ । ग्रन्थसंख्या २५००० । पत्रसंख्या ४०४ । पूर्णा ।

समय :-- श्रीशाके १८१६ श्रीसम्बत १९५१ श्रीनेपालीयसम्वत् १०१५ साल मिति फल्गुणशुदि ५ रोज शुभम् ।

शतसाहस्त्रिका प्रज्ञापारमिता

क्रमाङ्क त. ७३७ विषयाङ्क: १०१

ग्रन्थकार: । ताडपत्राणि ।पूर्वलिच्छवीलिपि: । पङ्क्तय: ५ ।
आकार: १६$\frac{३}{४}$×२ । ग्रन्थसंख्या २७० । पत्रसंख्या ६ । प्रकीर्णपत्राणि ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शब्दादिप्रामाण्यखण्डनम्

क्रमाङ्कः प्र. १६६७ क १ विषयाङ्कः १०२

ग्रन्थकारः । ताडपत्राणि । प्राचीननेवारीलिपिः । पङ्क्तयः ७ ।
आकारः १२×२ । ग्रन्थसंख्या १०० । पत्रसंख्या ४ । पूर्णम् ।

शशकावदानम्

क्रमाङ्क त ५६२ विषयाङ्कः १०३

ग्रन्थकारः । नेपालीय कागतम् । नेवारीलिपिः । पङ्क्तयः १० ।
आकार १२½×६½ । ग्रन्थसंख्या १२० । पत्रसंख्या ५ । पूर्णम् ।

शार्दूलकर्णावदानम्

क्रमाङ्कः च. २७० विषयाङ्कः १०४

ग्रन्थकारः । नेपालीयं कागतम । नेवारीलिपिः । पङ्क्तयः ८ ।
आकारः ८½×३ । ग्रन्थसंख्या ४७५ । पत्रसंख्या २८ । अन्त्यखण्डितम् ।

शिराहुतिविधिः

क्रमाङ्कः च. १०३३ विषयाङ्कः १०५

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ६ ।
आकारः ६×३ । ग्रन्थसंख्या १६२ । पत्रसंख्या व्यासमफू । पूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिष्यानुग्रहः

क्रमाङ्कः प्र. १६६७ ख २ विषयाङ्क १०६

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ६ ।
आकार १०½×२½ । ग्रन्थसंख्या १४० । पत्रसंख्या ९ । अन्त्यखण्डितः

आदिवाक्यम् —

नमः श्रीवज्रयोगिन्यै ॥
अथातो रहस्यं वक्ष्ये गुरुवक्त्रानुसारतः ।
नानासाधनसिद्ध्यर्थं शिष्यावेशविधिम्परम् ॥

पुष्पिकावाक्यानि —

इति शिष्यानुग्रहे बाह्यपूजाविधिः प्रथमः
,, कलशाधिवासनविधिः द्वितीयः
,, आवेशविधिस्तृतीयः
,, अति ··· मण्डलविधिश्चतुर्थः
,, कौमारीपूजाविधिः पञ्चमः
,, वलिकर्मविधिः षष्ठमः
,, होमविधिः सप्तमः
,, रक्षाचक्रविधिरष्टमः
,, निषम्भविधि
,, प्रत्यङ्गिराचक्रभावेनादिक्रमविधिः नवमः

इत्यतः पञ्चमपङ्क्त्यनन्तरं खण्डितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शृङ्गभेरीकथा
(चित्रविंशत्यवदानान्तर्गता)

क्रमाङ्कः तृ. २९० विषयाङ्कः १०७

ग्रन्थकारः। नेपालीयं कागतम्। नेवारीलिपिः। पङ्क्तयः ६।

आकारः १४×४। ग्रन्थसंख्या ५०००। पत्रसंख्या १९। पूर्णा।

आदिवाक्यम् —

ॐ नमः श्रीरत्नत्रयाय।
आकाशनिर्मलो भूतो निष्प्रपञ्चगुणाश्रयः।
पञ्चस्कन्धात्मकः शान्त(स्) तस्मै स्तूपात्मने नमः॥

एवं मया श्रुतमेकस्मिन्समये भगवान् राजगृहे विहरतिस्म। गृद्धकूटे पर्वते महता भिक्षुसंघेन सार्द्धं त्रयोदशभिर्भिक्षुशतैः संबहु(लैः) श्च बोधिसत्वैर्महासत्वैःसवलोकपालै अनेक देवनागयक्ष-गन्धर्वासुरकिन्नरमहोरगैः। अनेकैश्च गुवर्णमनुष्यैः परिवृतं पुरस्कृत्य भगवान्नभानस्मिन्। तत्र खलु भगवान्सर्वसत्वो नामाघमोचनार्थं देशयतिस्म-

आदौ कल्याणं मध्ये कल्याणं पर्यवशान्ते (साने) कल्याणं स्वर्थं सुव्यञ्जनं केवलं परिपूर्णं परिशुद्धं पर्यवदातं ब्रह्मचर्यं संप्रकाशयतिस्म।

अथ भिक्षुः शारिपुत्रः स्वस्वासनात्मुत्थाय समुत्तरासंगं कृत्वा त्रिप्रदक्षिणीकृत्य सव्य जानुमण्डलं च पृथिव्यां प्रतिस्थाप्य भगवन्तं प्रणामन्तदादरमवोचत् मुदा।

नानावाद्यं प्रनाजानामि नश्रुतं भगवन्प्रभो।
शृङ्गभेरीति नामेयं लक्षचैत्यविधिः कथं॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्त्यवाक्यम्—

पुनर्भगवानाह- तदद्यापि भिक्षवो लोके चैत्यव्रतं प्रवर्तते ।
लक्षचैत्यं समाधाय सर्वत्र भव कौशलम् ॥
इति श्रुत्वा मुने र्वाक्यं मुमुहुर्वृषपार्षदैः ।
क्रमेणैतं मुनिं नत्वा स्वस्वालयं मुदा ययौ ॥
अपरिमितसुरसङ्घैः देवकन्याभियुक्तं
जिनवरसुततुल्यः पूज्यमानो नृपाद्यैः ।
मणिमयशुभगेहे तिस्थति स्तम्भशोभे
पठति धरति चापि श्रावयस्तु (न्तु) सधर्मं ॥
इति श्रीचित्रविंशत्यावदाने चक्षचैत्यव्रतशृंगभेरीकथा समाप्ता।

समयः-- वत्सरेऽश्वीन्दुखचन्द्रे (१०१७) शुक्ल तिथौ शिवा।
शृङ्गभेरीकथासंज्ञालिखद्वज्रधरेण तां ॥

शृङ्गभेरीकथा
(चित्रविंशत्यवदानान्तर्गता)

क्रमाङ्कः तृ ५६४ — विषयाङ्क १०८

ग्रन्थकारः। नेपालीयं कागतम् । देवनागरीलिपिः। पङ्क्तय १३।
आकारः १२$\frac{1}{4}$×६$\frac{1}{4}$ । ग्रन्थसंख्या २५०। पत्रसंख्या १०। पूर्णा।

समयः— सं. १६५५।

शृंगभेरीकथा
(चित्रविंशत्यवदानान्तर्गता)

क्रमाङ्कः च १०३५ — विषयाङ्क १०९

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ६ ।
आकारः ६ × ३$\frac{५}{२}$ । ग्रन्थसंख्या १८० । पत्रसंख्या १६ । पूर्णा ।

श्मशानपूजादिसंग्रहः
(ने. भा. स.)

क्रमाङ्कः च. १०३०   विषयाङ्कः ११०

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ६ ।
आकारः ५$\frac{१}{४}$ × २" । ग्रन्थसंख्या १०८ । पत्रसंख्या १६ । पूर्णप्रायः ।

श्राद्धविधिः,अस्थिप्रव हविधि
(ने. भा. स.)

क्रमाङ्कः घ. १०३३   विषयाङ्कः १११

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ५ ।
आकारः ७×२^{१} । ग्रन्थसंख्या १३२ । पत्रसंख्या अ्याससफू । पूर्णा ।

श्रीकुलिशेश्वरगुह्यम्

क्रमाङ्क च ६१८   विषयाङ्कः ११२

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ५ ।
आकार ७×२^{१} । ग्रन्थसंख्या १२० । पत्रसंख्या २१ । षोडशमानसिकचक्रान्त-
पूर्णम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीगणेशव्रतविधानम्

क्रमाङ्क तृ. २७०　　　　विषयाङ्कः ११३

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ८ ।
आकारः ८$\frac{?}{?}$×५ । ग्रन्थसंख्या १० । पत्रसंख्या ७। पूर्णम् ।

श्रीघनप्रकाशितगयापादः

क्रमाङ्कः तृ. ७७२　　　　विषयाङ्कः ११४

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ८ ।
आकारः १२$\frac{1}{2}$×५ । ग्रन्थसंख्या ६० । पत्रसंख्या ५ । द्वितीयाध्यायान्तः पूर्णः ।

श्रीज्ञानडाकिनीसाधनम्

क्रमाङ्कः तृ. ३३३　　　　विषयाङ्कः ११५

ग्रन्थकारः । ताडपत्राणि । नेवारीलिपिः । पङ्क्तयः ५ । आकारः ११$\frac{3}{?}$×१$\frac{3}{4}$।
ग्रन्थसंख्या ६० । पत्रसंख्या ७ । अन्त्यखण्डितम् ।

श्रीत्रिरत्नगाथा

(भा. टी. स.)

क्रमाङ्कः द्वि. १६६　　　　विषयाङ्कः ११६

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः ११ ।
आकारः १४$\frac{3}{4}$×६$\frac{1}{4}$ । ग्रन्थसंख्या ३०० । पत्रसंख्या ११ । मध्यखण्डितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रोणकोटीकर्णावदानम्

क्रमाङ्कः तृ. ५६४ विषयाङ्कः ११७

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरीलिपिः । पङ्क्तयः १० ।
आकारः १२½×६ । ग्रन्थसंख्या ४०८ । पत्रसंख्या १६ । पूर्णम् ।

समयः— सम्वत् १९५४ साल मिति पौष शुक्ल ८ रोज ६ शुभम् ।

श्लोकार्थपरामृतम्

क्रमाङ्कः तृ. ६९३ विषयाङ्कः ११८

ग्रन्थकार । ताडपत्राणि । नेवारीलिपिः । पङ्क्तयः ६ । आकारः ७¼×१½ ।
ग्रन्थसंख्या ४० । पत्रसंख्या ३ (९१–९३) । अन्त्यखण्डितम् ।

षट्गतिकारिका

क्रमाङ्कः तृ. ११५ विषयाङ्कः ११९

ग्रन्थकारः महापण्डित आशुघोषः । ताडपत्राणि । प्राचीन नेवारीलिपिः ।
पङ्क्तयः ६ । आकारः ११¾×२½ । ग्रन्थसंख्या २०० । पत्रसंख्या १० ।
मध्यखण्डिता ।

आदिवाक्यम् —

श्री वज्रसत्त्वपदवीप्रतिलंमहेतो –
र्नत्वा यथाविधि गुरोश्चरणारविन्दम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्पर्युपास्तिरमला वहुतन्त्रभीता
संक्षिप्य कथ्यत इयं श्रुणुतादरेण ॥
अभिषेकाग्रलब्धोह वज्राचार्यस्तथागतैः ।
दशदिक्लोकधातुस्थै स्त्रिकालमित्यवन्दते ॥
त्रिकालं परमया भक्त्या सपुष्पाञ्जनमण्डलै ।
पर्युपास्यो गुरुःशास्ता शिरसा पादवन्दनैः ॥
सद्धर्मादीन्पुरस्कृत्य गृही वा नवकोपि वा ।
वन्द्यो व्रतवरै वुद्धया लोकोवध्या महानये ॥
आसनदानसमुत्थानमर्थक्रियादिगौरवम् ।
सर्वमेव व्रती कुर्यात् भक्त्यात्मकैरवन्दनाम् ॥

अन्त्यवाक्यम् —

एवं विरागमाप्नोति विरक्तः पुण्यमर्चति ।
पापं च वर्जयेत्येव तेन संक्षिप्यतः श्रृणु
सम्यकपरार्थकरण ... ... परार्थंविवर्जनम् ।
पुण्यं विपर्ययात्पापमुक्तमेतन्महात्मना ॥

देवकाण्डं समाप्तम् । आर्यसद्धर्मस्मृत्युपस्थानमहायानसूत्रान्तःसमाकृष्टा महापण्डिताशुपेषेण षद्गतिकारिका समाप्ता ।

षोडशपिण्डविधिः

क्रमाङ्कः च १०३४ विषयाङ्कः १७०

ग्रन्थकारः। नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ६ । आकारः ८×४ । ग्रन्थसंख्या ६० । पत्रसंख्या ठ्यासफू । पूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सङ्क्षिप्तदेवप्रतिष्ठाविधिः (ने.भा.स.)
मुहूर्तविचारसहिता

क्रमाङ्कः च. १०३३ विषयाङ्कः १२१

ग्रन्थकारः। नेपालीयं कागतम्। नेवारीलिपिः। पङ्क्तयः ५।
आकारः ८×२३" ग्रन्थसंख्या १८०। पत्रसंख्या १७। पूर्णा।

सङ्क्षिप्ताभिषेकविधिः

क्रमाङ्कः तृ. ३८७ विषयाङ्कः १२२

ग्रन्थकारः महापण्डिताचार्यः वागीश्वरकिर्तिः। ताडपत्राणि। भुजिमोलिपिः।
पङ्क्तयः ७। आकारः १२३×२। गन्थसंख्या १७०। पत्रसंख्या ७। पूर्णा।

आदिवाक्यम् —

नमः श्रीवज्रसत्वाय।
उदकमुकुटवज्राधिघण्टासनाम
त्रिकुलसमयभव्याचार्यगुहेतुराद्यैः।
नवभिरमितपुण्यैर्याभिषेकप्रकारैः —
र्जनयति भवशुद्धिं तारिणी तां नमामि ॥
जानाति संक्षिप्तरुचिर्निरुद्यमो विहीनमेव कलिकालसङ्गमात्।
अतोभिषेकक्रम एष विस्तरं विहा(य)वागीश्वग्नीर्तिनोच्यते ॥
नतीध्याय न मूर्खाय न शुष्कतर्करताय च।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न श्रावकाय न षण्ढाय न वृद्धायाभार्याय च ।
राज्ञेपि न पुत्राय न श्रद्धारहिताय च ।
सप्ताष्टमौ प्रदातव्यौ शासने हितमिच्छता ॥

अन्त्यवाक्यम् --

शंसेन्दुकुन्दकुमुदाम्बुजकान्तिहारि
ह(सं)क्षिप्तमेकवचनात्मम संप्रसृतं ।
युत्पुण्यसमरसमजागदस्तु तेन
प्रज्ञारविन्दभवचञ्चरश्भावम ॥

इति सम्क्षिप्ताभिषेकविधिः सामाजिकः समाप्तः । कृतिरियम्महापण्डिताचार्य (वागीश्वरकीर्ति) पादानामिति । ग्रन्थस्य प्रमाणा श्लोक १७० श्री रुद्रदेवस्य विजयराज्ये सकलसत्वार्थहेतुना ।

सङ्क्षिप्तलोकाचारसर्वसंग्रह

(ने. भा. स.)

क्रमाङ्कः च. १०३३ विषयाङ्कः १२३

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ८ ।
आकारः१८३/४×४१/२ । ग्रन्थसंख्या १६०० । पत्रसंख्या ४४ । मध्यखण्डितः

आदिवाक्यम् —

ॐ नमः श्रीवज्रसत्वाय ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आकाशनिर्मलो भूतो निष्प्रपञ्चगुणाश्रयः । पञ्चस्कन्धात्मकः शास्ता तस्मै स्तूपात्मने नमः ॥ श्रीगुरुवरमानन्दं वन्दे आनन्दविग्रह । जनकं सर्वलोकानां प्रणम्य परमं गुरुं । प्रभास्व–रात्महाशून्यं तस्माच्चोपायसंभवं । तस्मादुत्पद्यते प्रज्ञा तस्मात्पवनसंभव॥ पवनाज्जा॰यते तेज स्तेजसो जायते जलं । जलाच्च जायते कूर्मस्तस्मात्पृथ्वी च सम्भव·

प्रभाश्वर महाशून्य जुया व चोर(ङ) वज्रचिन्हमात्र उत्पति जुर, थास शून्यताया ज्ञान प्रज्ञापारमिता उत्पत्ति जुरं । थोस पवनमहावायुमन्डल उत्पत्तिजुरं । थोस अग्निमन्डल उत्पत्ति जुरं । थोस महाकूर्म उत्पत्ति जुर । थ्त्रोस पृथ्वीमण्डल उत्पत्ति जुरं ।

अन्त्यवाक्यम --

सर्वतथागतं शान्तं सर्वताथागतालयं । सर्वधर्माग्नैरात्म्यं देशमन्डल–मुक्तमं ॥ शान्तधर्माग्नभू ज्ञानचर्याविशोधकं । समन्तभद्रकायाम भाषमण्डलमुत्तमं ॥ सर्वलक्षणासम्पूर्णं सर्वजक्षणाद्वर्जितं । समन्तभद्रवाचाग्र घोषमण्डलमुत्तमं ॥ सर्वसत्वमहा॰चित्तशुद्धं प्रकृतिनिर्मलं । समन्तभद्रचित्ताग्रं भाषमण्डल सारथे ॥ थोस आसिर्वाद बिय. विसर्जनयाय, थनलि शिष्य नं दक्षिणा बिय थ्वया लिव गुरुं आशिषविय धन दीप-दान । ततो दानपतिना ज्येष्ठ प्रभृतिनं कृताञ्जली याङाव विसर्जनं प्रार्थयेत् । इति सम्क्षिप्तलोकाचारसर्वसङ्ग्रहः समाप्तः । शुभं भूयात् ।

सच्चकुताडनकथा

(विश्वभद्रविहारचैत्यस्थापनकथा)

क्रमाङ्कः तृ. ६६६ विषयाङ्कः १२४

ग्रन्थकारः । नेपालीयं कागतम । नेव.रीलिपिः । पङ्क्तयः ६ ।
आकारः १०½×२¾ । ग्रन्थसंख्या १३०० । पत्रसंख्या ५२ । पूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम्—

ॐ नमः श्रीबुद्धाय ॥

श्रीबोधिनाथमभिनित्यमानित्यतारं संसारसागरमहार्णवदुःखतारं ।
ज्ञानांशुकोमलकलो (रो) ज्वलमादिबुद्धं तं नौमि देवमतिशान्तस्वभावरूपं ॥

सत्कर्मतारांडानमयं वरबुद्धसंगं
लोकोत्तमं बहुविधं सुगतस्य वाक्यं ।
वैशेषिकेन तनुमल्लविनाशहेतोः
वद्याम्यहं कुशलपुण्यपदार्थलब्ध्यै ॥
कृत्वा च यत्कर्म नरो हि शीघ्र-
मनादिकालार्चितकल्मषाणि ।
निहन्ति तस्मादिह मानवानां
वद्याम्यहं सच्चक्रताडनाख्यं ॥
सन्मृन्मयैर्लद्यकचैत्यबिम्बं विधानयुक्तं विनयोपचारं ।
किञ्चित्प्रदातं फलमप्रमेयं स्वर्गादिकं च शृणुतावतारं ॥

अन्त्यवाक्यम्—

एवमभिसमायुक्तो बोधिसत्त्वो गुणाकरः ।
स्थातुं तत्र समर्थोऽस विहारचैत्यसेवकः ॥

अथ विश्वभद्रो बोधिसत्त्वो भगवता कृताभ्यनुज्ञा यथाविधिविहारं कृत्वा तत्स्फटिकचैत्यं स्थापयामास । तत्सेवकस्वयंकारी भूत्वा विश्वभद्रो नाम ॥ प्रसिद्धस्तत्र (दास्थितो ब भूव । इत्यवोचद् भगवानात्तमनसस्तेच भिक्षवो भगवतो भाषितमभ्यनन्दन्निति । इति श्री-विश्वभद्रबोधिसत्त्वयथाविधिविहारचैत्यस्थापनो नाम कथा समाप्त (ता) ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सच्चकुताडनकथा
(विश्वभद्रविहारचैत्यस्थापनकथा)

क्रमाङ्कः तृ. ६५७ विषयाङ्कः १२५

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ८ ।
आकारः ११३ × ४३ । ग्रन्थसंख्या १३०० । पत्रसंख्या ५७ । पूर्णा ।

सद्‌धर्मपाराजिका

क्रमाङ्कः तृ. २६० विषयाङ्कः १२६

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ८ ।
आकारः ११३ × ३३ । ग्रन्थसंख्या ५० । पत्रसंख्या ३ । खण्डिता ।

आदिवाक्यम् —

सर्वबुद्धं नमस्यामि सर्वसत्त्वार्थकारणात् ॥
सर्वकर्मविशुद्ध्यर्थं सर्वदुःखोपशान्तये॥

अन्त्यवाक्यम् —

आर्यसद्धर्मत्रिपाटकादुद्धृतसत्वस्य कुकर्मजविपाकशुद्धिप्रायश्चित्तविधिः समाप्तः ।
इति प्रत्येकाधिष्ठानमन्त्र —

ॐ हुं त्रां ह्रीं खं हुं पूर्वोक्तमन्त्रेण मिलयेत् इति । पञ्चगव्यस्थापनं, भूमध्ये पञ्चमण्डलीकं कृत्वा तत्र मध्ये गोमयं स्थाप्य पूर्वे गोमूत्रं भवेत्, दक्षिणे दधि, पश्चिमे दुग्धम्, उत्तरे गोघृतम् मध्ये च कुशोदकमिति ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सद्धर्मपुण्डरीकं

विषयाङ्क १२७

क्रमाङ्कः तृ. ६१३

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ७ ।
आकारः १०.५×४ । ग्रन्थसंख्या ५४०० । पत्रसंख्या २२६ । पूर्णम

आदिवाक्यम —

ॐ नमः सर्वबुद्धबोधिसत्वेभ्यः ।

वैपुल्यसूत्रराजं परमार्थनयावतारनिर्देशं सद्धर्मपुण्डरीकं सत्वाय महापथं वक्ष्ये— एवं मयाश्रुतमेकस्मिन्समये भगवान् राजगृहे विहरतिस्म । गृद्धकूटे पर्वते महाभिक्षुसंघेन सार्द्धं द्वादशभि भिक्षुशतैः सर्वैरर्हद्भिः क्षीणाश्रवैरनिक्लेशै वशीभूतैः सुविमुक्तचित्तैः सुविमुक्तप्रज्ञैः राजान्यै महानागै कृतकृत्यै कृतकरणीयै रपहृतभारैरनुप्राप्तस्वकार्थैः परिक्षीणभवसंयोजनैः सम्यगाज्ञासुविमुक्तचित्तैः सर्वचेतोवशि- (ता) परमपारमिताप्राप्तैः राभिज्ञाभिज्ञातैः महाश्रावकैः स्तद्यथाआयुष्मता चाज्ञातकौण्डिन्येन, इत्यादि

पुष्पिकावाक्यानि —

इति श्रीआर्यसद्धर्मपुण्डरीके धर्मपर्यायनिदानपरिवर्तो नामप्रथमः
" उपायकौशल्यनिर्देशपरिवर्तो नाम द्वितीयः
" औपम्यपरिवर्तो नाम स्तृतीयः
" अधिमुक्तिपरिवर्तो नाम पञ्चमः
" औषधीपरिवर्तो नाम षष्ठः
" पूर्वयोगपरिवर्तो नाम सप्तमः
" पञ्चशतभिक्षुव्याकरणपरिवर्तो नामाष्टमः
" आनन्देदराहुलाभ्यां च द्वाभ्यां भिक्षुसहस्राभ्यां व्या-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करुणापरिवर्तो नाम नवमः
,, धर्मभाणकपरिवर्तो नाम दशमः
,, स्तूपसंदर्शनपरिवर्तो नाम एकादशः
,, उत्साहपरिवर्तो नाम द्वादशः
,, सुखविहारपरिवर्तो नाम त्रयोदशमः
,, बोधिसत्त्वपृथ्वीविवरसमुद्गमपरिवर्तश्चतुर्दशः
,, तथागतायुष्प्रमाणपरिवर्तो नाम पञ्चदशः
,, पुण्यपर्यायपरिवर्तो नाम षोदशमः
,, अनुमोदनापुण्यनिर्देशपरिवर्तो नाम सप्तादशमः
,, षडायतनविशुद्धिधर्मभाणकानुशंसापरिवर्तो नामाष्टादशः
,, सदापरिभूतपरिवर्तो नामैकोनविंशतितमः
,, तथागताध्यभिसंस्कारपरिवर्तोनाम विंशतितमः
,, धर्मपर्यायधारणीपरिवर्तो नामैकविंशतितमः
,, भैषज्यराजपूर्वयोगपरिवर्तो द्वाविंशतितमः
,, गगदस्वरपरिवर्तो नाम त्रयोविंशतितमः
,, समन्तमुखपरिवर्तो नामावलोकितेश्वरविकुर्वानश्चतुर्विंशतितमः
